# श्रीमद् भागवत रसिक कुटुंब

## श्रीजगन्नाथसहस्रनाम

॥ ॐ श्रीजगन्नाथाय नमो नमः ॥

### प्रार्थना

देव दानव गन्धर्व, यक्ष विद्याधरोरगैः ।
सेव्यमानं(म्) सदा, चारुकोटिसूर्यसमप्रभम् ॥ 1॥

ध्यायेन् नारायणं(न्) देवं(ञ्), चतुर्वर्गफलप्रदम् ।
जय कृष्ण जगन्नाथ, जय सर्वाऽधिनायक ॥ 2 ॥

जयाऽशेष जगद्- वन्द्य पादाम्भोज नमोऽस्तु ते ॥ 3 ॥

युधिष्ठिर उवाच
यस्य प्रसादात्तु सर्वं(यँ), यस्तु विष्णुपरायणः ।
यस्तु धाता विधाता च, यस्य सत्यं(म्) परो भवेत् ॥ 4 ॥

यस्य मायामयं(ञ्) जालं(न्), त्रैलोक्यं(म्) सचराचरम् ।
मर्त्यांश्च मृगतृष्णायां(म्), भ्रामयत्यपि केवलम् ॥ 5 ॥

नमाम्यहं(ञ्) जगत् प्रीत्या, नामानि च जगत्पतिम् ।
बृहत्या कथितं(यँ) यच्च, तन्मे कथय साम्प्रतम् ॥ 6 ॥

भीष्म उवाच

युधिष्ठिर महाबाहो, कथयामि शृणुष्व मे ।
जगन्नाथस्य नामानि, पवित्राणि शुभानि च ॥ 7 ॥

मायया यस्य सं(म्)सारो, व्यापृतः(स्) सचराचरः ।
यस्य प्रसादाद्ब्रह्माणं(म्), सृष्ट्वा पाति च सर्वदा ॥ 8 ॥

ब्रह्मादिदशदिक्पालान्, मायाविमोहितान् खलु ।
यस्य चेष्टावरोहश्च ब्रह्माण्डखण्डगोचरः ॥ 9 ॥

दया वा ममता यस्य, सर्वभूतेषु सर्वगः ।
सत्यधर्मविभूषस्य, जगन्नाथस्य सर्वतः ॥ 10 ॥

कथयामि सहस्राणि, नामानि तव चानघ ॥ 11 ॥
अथ श्रीजगन्नाथस्य सहस्रनामस्तोत्रम् ।

## अथ विनियोगः

अस्य मातृका मन्त्रस्य, श्री वेदव्यासो ऋषिः, अनुष्टुप्छन्दः,
श्रीजगन्नाथो देवता, भगवतः(श्) श्रीजगन्नाथस्य प्रीत्यर्थे
सहस्रनाम पठने विनियोगः ।

## ध्यानम्

नीलाद्रौ शङ्खमध्ये शतदलकमले रत्नसिं(म्)हासनस्थं(म्)
सर्वालङ्कारयुक्तं(न्) नवघनरुचिरं(म्) सं(यँ)युतं(ञ्) चाग्रजेन ।
भद्राया वामभागे रथचरणयुतं(म्) ब्रह्मरुद्रेन्द्रवन्द्यं(वँ)
वेदानां(म्) सारमीशं(म्) स्वजनपरिवृतं(म्) ब्रह्मदारु स्मरामि ॥

श्रीभगवानुवाच

चतुर्भुजो जगन्नाथः(ख्), कण्ठशोभितकौस्तुभः ।
पद्मनाभो वेदगर्भश्-चन्द्रसूर्यविलोचनः ॥ 1 ॥

जगन्नाथो लोकनाथो, नीलाद्रीशः(फ्) परो हरिः ।
दीनबन्धुर्दयासिन्धुः(ख्), कृपालुः(र्) जनरक्षकः ॥ 2 ॥

कम्बुपाणिः(स्) चक्रपाणिः(फ्), पद्मनाभो नरोत्तमः ।
जगतां(म्) पालको व्यापी, सर्वव्यापी सुरेश्वरः ॥ 3 ॥

लोकराजो देवराजः(श्), शक्रो भूपश्च भूपतिः ।
नीलाद्रिपतिनाथश्च, अनन्तः(फ) पुरुषोत्तमः ॥ 4 ॥

तार्क्ष्योध्यायः(ख्) कल्पतरुः(र्), विमलाप्रीतिवर्द्धनः ।
बलभद्रो वासुदेवो, माधवो मधुसूदनः ॥ 5 ॥

दैत्यारिः(फ्) पुण्डरीकाक्षो, वनमाली बलप्रियः ।

ब्रह्मा विष्णुः(र्) वृष्णिवं(म्)शो, मुरारिः(ख) कृष्णकेशवः ॥ 6॥

श्रीरामः(स्) सच्चिदानन्दो, गोविन्दः(फ्) परमेश्वरः ।
विष्णुर्जिष्णुर्महाविष्णुः(फ्), प्रभविष्णुर्महेश्वरः ॥ 7 ॥

लोककर्ता जगन्नाथो, महाकर्ता महायशाः ।
महर्षिः(ख) कपिलाचार्यो, लोकचारी सुरो हरिः ॥ 8 ॥

आत्मा च जीवपालश्च, शूरः(स्) सं(म्)सारपालकः ।
एकोनैको ममप्रियो, ब्रह्मवादी महेश्वरः ॥ 9 ॥

द्विभुजश्च चतुर्बाहुः(श्), शतबाहुः(स्) सहस्रकः ।
पद्मपत्रविशालाक्षः(फ्), पद्मगर्भः(फ्) परो हरिः ॥ 10 ॥

पद्महस्तो देवपालो, दैत्यारिर्दैत्यनाशनः ।
चतुर्मूर्तिश्चतुर्बाहुश्- चतुराननसेवितः ॥ 11 ॥

पद्महस्तश्चक्रपाणिः(श्), शङ्खहस्तो गदाधरः ।
महावैकुण्ठवासी च, लक्ष्मीप्रीतिकरः(स्) सदा ॥ 12 ॥

विश्वनाथः(फ्) प्रीतिदश्च, सर्वदेवप्रियं(ङ्)करः ।
विश्वव्यापी दारुरूपश्- चन्द्रसूर्यविलोचनः ॥ 13 ॥

गुप्तगङ्गोपलब्धिश्च, तुलसीप्रीतिवर्द्धनः ।
जगदीशः(श्) श्रीनिवासः(श्), श्रीपतिः(श्) श्रीगदाग्रजः ॥ 14 ॥

सरस्वतीमूलाधारः(श्), श्रीवत्सः(श्) श्रीदयानिधिः ।
प्रजापतिः(र्) भृगुपतिर् भार्गवो नीलसुन्दरः ॥ 15 ॥

योगमायागुणारूपो, जगद्योनीश्वरो हरिः ।
आदित्यः(फ) प्रलयोद्धारी, आदौ सं(म्) सारपालकः ॥ 16 ॥

कृपाविष्टः(फ्) पद्मपाणि-रमूर्तिर्जगदाश्रयः ।
पद्मनाभो निराकारः, निर्लिप्तः(फ्) पुरुषोत्तमः ॥ 17 ॥

कृपाकरो जगद्व्यापी, श्रीकरः(श्) शङ्खशोभितः ।
समुद्रकोटिगम्भीरो, देवताप्रीतिदः(स्) सदा ॥ 18 ॥

सुरपतिर्भूतपतिर्ब्रह्मचारी पुरन्दरः ।
आकाशवायुमूर्तिश्च, ब्रह्ममूर्तिर्जलेस्थितः ॥ 19 ॥

ब्रह्मा विष्णुर्दृष्टिपालः(फ्), परमोऽमृतदायकः ।
परमानन्दसम्पूर्णः(फ्), पुण्यदेवः(फ्) परायणः ॥ 20 ॥

धनी च धनदाता च धनगर्भो महेश्वरः ।
पाशपाणिः(स्) सर्वजीवः(स्), सर्वसं(म्)साररक्षकः ॥ 21 ॥

**देवकर्ता ब्रह्मकर्ता, वषिष्ठो ब्रह्मपालकः ।**

**जगत्पतिः(स्) सुराचार्यो, जगद्व्यापी जितेन्द्रियः ॥ 22 ॥**

**महामूर्तिर्विश्वमूर्तिर्-महाबुद्धिः(फ्) पराक्रमः ।**

**सर्वबीजार्थचारी च द्रष्टा वेदपतिः(स्) सदा ॥ 23 ॥**

**सर्वजीवस्य जीवश्च, गोपतिर्मरुतां(म्) पतिः ।**

**मनोबुद्धिरहं(ङ्)कार-कामादिक्रोधनाशनः ॥ 24 ॥**

**कामदेवः(ख्) कामपालः(ख्), कामाङ्गः(ख्) कामवल्लभः ।**

**शत्रुनाशी कृपासिन्धुः(ख), कृपालुः(फ्) परमेश्वरः ॥ 25 ॥**

**देवत्राता देवमाता, भ्राता बन्धुः(फ) पिता सखा ।**

**बालवृद्धस्तनूरूपो, विश्वकर्मा बलोऽबलः ॥ 26 ॥**

**अनेकमूर्तिः(स्) सततं(म्), सत्यवादी सतां(ङ्) गतिः ।**

**लोकब्रह्म बृहद्ब्रह्म, स्थूलब्रह्म सुरेश्वरः ॥ 27 ॥**

**जगद्व्यापी सदाचारी, सर्वभूतश्च भूपतिः ।**

**दुर्गपालः(ह) क्षेत्रनाथो, रतीशो रतिनायकः ॥ 28 ॥**

**बली विश्वबलाचारी, बलदो बलि - वामनः ।**

**दरहासः(श्) शरच्चन्द्रः(फ्), परमः(फ्) परपालकः ॥ 29 ॥**

अकारादिमकारान्तो, मध्योकारः(स्) स्वरूपधृक् ।
स्तुतिस्थायी सोमपाश्च, स्वाहाकारः(स्) स्वधाकरः ॥ 30 ॥

मत्स्यः(ख्) कूर्मो वराहश्च, नरसिं(म्)हश्च वामनः ।
परशुरामो महावीर्यो, रामो दशरथात्मजः ॥ 31 ॥

देवकीनन्दनः(श्) श्रेष्ठो नृहरिः(र्) नरपालकः |
वनमाली देहधारी, पद्ममाली विभूषणः ॥ 32 ॥

मल्लीकामालधारी च, जातीयूथिप्रियः(स्) सदा ।
बृहत्पिता महापिता, ब्राह्मणो ब्राह्मणप्रियः ॥ 33 ॥

कल्पराजः(ख्) खगपतिर्- देवेशो देववल्लभः ।
परमात्मा बलो राज्ञां(म्), माङ्गल्यं(म्) सर्वमङ्गलः ॥ 34 ॥

सर्वबलो देहधारी, राज्ञां(ञ्) च बलदायकः ।
नानापक्षिपतङ्गानां(म्), पावनः(फ़्) परिपालकः ॥ 35 ॥

वृन्दावनविहारी च नित्यस्थलविहारकः ।
क्षेत्रपालो मानवश्च, भुवनो भवपालकः ॥ 36 ॥

सत्त्वं(म्) रजस्तमोबुद्धि- रहङ्कारपरोऽपि च ।
आकाशं(ङ्)गो रविः(स्) सोमो, धरित्रीधरणीधरः ॥ 37॥

निश्चिन्तो योगनिद्रश्च कृपालुः(र्) देहधारकः ।
सहस्रशीर्षा श्रीविष्णुर्- नित्यो जिष्णुर्निरालयः ॥ 38 ॥

कर्ता हर्ता च धाता च, सत्यदीक्षादिपालकः ।
कमलाक्षः(स्) स्वयम्भूतः(ख्), कृष्णवर्णो वनप्रियः ॥ 39॥

कल्पद्रुमः(फ्) पादपारिः(ख), कल्पकारी स्वयं(म्) हरिः ।
देवानां(ञ्) च गुरुः(स्) सर्व- देवरूपो नमस्कृतः ॥ 40 ॥

निगमागमचारी च, कृष्णगम्यः(स्) स्वयं(यँ) यशः ।
नारायणो नराणां(ञ) च लोकानां(म्) प्रभुरुत्तमः ॥ 41 ॥

जीवानां(म्) परमात्मा च, जगद्वन्द्यः(फ्) परो यमः ।
भूतावासो परोक्षश्च सर्ववासी चराश्रयः ॥ 42 ॥

भागीरथी मनोबुद्धिर्- भवमृत्युः(फ्) परिस्थितः ।
संं(म्)सारप्रणयी प्रीतः(स्), सं(म्) साररक्षकः(स्) सदा ॥ 43 ॥

नानावर्णधरो देवो, नानापुष्पविभूषणः ।
नन्दध्वजो ब्रह्मरूपो, गिरिवासी गणाधिपः ॥ 44 ॥

मायाधरो वर्णधारी, योगीशः(श्) श्रीधरो हरिः ।
महाज्योतिर्महावीर्यो, बलवां(म्)श्च बलोद्भवः ॥ 45 ॥

भूतकृत् भवनो देवो, ब्रह्मचारी सुराधिपः ।
सरस्वती सुराचार्यः(स्), सुरदेवः(स्) सुरेश्वरः ॥ 46 ॥

अष्टमूर्तिधरो रुद्र, इच्छामूर्तिः(फ्) पराक्रमः ।
महानागपतिश्चैव, पुण्यकर्मा तपश्चरः ॥ 47 ॥

दिनपो दीनपालश्च, दिव्यसिं(म्)हो दिवाकरः ।
अनभोक्ता सभोक्ता च, हविर्भोक्ता परोऽपरः ॥ 48॥

मन्त्रदो ज्ञानदाता च, सर्वदाता परो हरिः ।
परर्द्धिः(फ़्) परधर्मा च सर्वधर्मनमस्कृतः ॥ 49 ॥

क्षमादश्च दयादश्च, सत्यदः(स्) सत्यपालकः ।
कं(म्)सारिः(ख्) केशिनाशी च, नाशनो दुष्टनाशनः ॥ 50 ॥

पाण्डवप्रीतिदश्चैव, परमः(फ्) परपालकः ।
जगद्धाता जगत्कर्ता, गोपगोवत्सपालकः ॥ 51॥

सनातनो महाब्रह्म, फलदः(ख) कर्मचारिणाम् ।
परमः(फ्) परमानन्दः(फ्), परर्द्धिः(फ्) परमेश्वरः ॥ 52॥

शरणः(स्) सर्वलोकानां(म्), सर्वशास्त्रपरिग्रहः ।
धर्मकीर्तिर्महाधर्मो, धर्मात्मा धर्मबान्धवः ॥ 53 ॥

मनः(ख्) कर्ता महाबुद्धिर् - महामहिमदायकः ।
भूर्भुवः(स्) स्वो महामूर्तिः(र्), भीमो भीमपराक्रमः ॥ 54॥

पथ्यभूतात्मको देवः(फ्), पथ्यमूर्तिः(फ्) परात्परः ।
विश्वाकारो विश्वगर्भः(स्), सुराहा च सुरेश्वरः ॥ 55 ॥

भुवनेशः(स्) सर्वव्यापी, भवेशो भवपालकः ।
दर्शनीयश्चतुर्वेदः(श्), शुभाङ्गो लोकदर्शनः ॥ 56 ॥

श्यामलः(श्) शान्तमूर्तिश्च, सुशान्तश्चतुरोत्तमः ।
सामप्रीतिश्च ऋक् प्रीतिर् - यजुषोऽथर्वणप्रियः ॥ 57 ॥

श्यामचन्द्रश्चतुमूर्तिश्- चतुर्बाहुश्चतुर्गतिः ।
महाज्योतिर्महामूर्तिर्- महाधामा महेश्वरः ॥ 58 ॥

अगस्तिर्वरदाता च, सर्वदेवपितामहः ।
प्रह्लादस्य प्रीतिकरो, ध्रुवाभिमानतारकः ॥ 59 ॥

मण्डितः(स्) सुतनुर्दाता, साधुभक्तिप्रदायकः ।
ॐकारश्च परं(म्)ब्रह्म, ॐ निरालं(म्)बनो हरिः ॥ 60 ॥

सद्गतिः(फ्) परमो हं(म्)सो, जीवात्मा जननायकः ।
मनश्चिन्त्यश्चित्तहारी, मनोज्ञश्चापधारकः ॥ 61 ॥

ब्राह्मणो ब्रह्मजातीना- मिन्द्रियाणां(ङ्) गतिः(फ्) प्रभुः ।
त्रिपादादूर्द्ध्वसम्भूतो, विराट् चैव सुरेश्वरः ॥ 62 ॥

परात्परः(फ्) परः(फ्) पादः(फ्), पद्मस्थः(ख्) कमलासनः ।
नानासन्देहविषयस्-तत्त्वज्ञानाभिनिवृतः ॥ 63 ॥

सर्वज्ञश्च जगद्बन्धुर्-मनोजज्ञातकारकः ।
मुखसं(म्)भूतविप्रस्तु, वाहसम्भूतराजकः ॥ 64 ॥

ऊरोवैश्यः(फ्) पदोभूतः(श्), शूद्रो नित्योपनित्यकः ।
ज्ञानी मानी वर्णदश्च सर्वदः(स्) सर्वभूषितः ॥ 65 ॥

अनादिवर्णसन्देहो, नानाकर्मोपरिस्थितः ।
शुद्धादिधर्मसन्देहो, ब्रह्मदेहः(स्) स्मिताननः ॥ 66 ॥

शं(म्)बरारिर्वेदपतिः(स्), सुकृतः(स्) सत्त्ववर्द्धनः ।
सकलं(म्) सर्वभूतानां(म्), सर्वदाता जगन्मयः ॥ 67 ॥

सर्वभूतहितैषी च, सर्वप्राणिहिते रतः ।
सर्वदा देहधारी च, बटको बटुगः(स्) सदा ॥ 68 ॥

सर्वकर्मविधाता च, ज्ञानदः(ख्) करुणात्मकः ।
पुण्यसम्पत्तिदाता च, कर्ता हर्ता तथैव च ॥ 69 ॥

सदा नीलाद्रिवासी च, नतास्यश्च पुरन्दरः ।
नरो नारायणो देवो, निर्मलो निरुपद्रवः ॥ 70 ॥

ब्रह्माशम्भुः(स्) सुरश्रेष्ठः(ख्), कम्बुपाणिर्बलोऽर्जुनः ।
जगद्धाता चिरायुश्च, गोविन्दो गोपवल्लभः ॥ 71 ॥

देवो देवो महाब्रह्म, महाराजो महागतिः ।
अनन्तो भूतनाथश्च, अनन्तभूतसम्भवः ॥ 72 ॥

समुद्रपर्वतानां(ञ्) च, गन्धर्वाणां(न्) तथाऽऽश्रयः ।
श्रीकृष्णो देवकीपुत्रो, मुरारिर्वेणुहस्तकः ॥ 73 ॥

जगत्स्थायी जगद्व्यापी, सर्वसं(म्)सारभूतिदः ।
रत्नगर्भो रत्नहस्तो, रत्नाकरसुतापतिः ॥ 74 ॥

कन्दर्परक्षाकारी च, कामदेवपितामहः ।
कोटिभास्करसं(ञ्)ज्योतिः(ख्), कोटिचन्द्रसुशीतलः ॥ 75 ॥

कोटिकन्दर्पलावण्यः(ख्), काममूर्तिर्बृहत्तपः ।
मथुरापुरवासी च, द्वारिको द्वारिकापतिः ॥ 76 ॥

वसन्तऋतुनाथश्च माधवः(फ्) प्रीतिदः(स्) सदा ।
श्यामबन्धुर्घनश्यामो, घनाघनसमद्युतिः ॥ 77 ॥

अनन्तकल्पवासी च, कल्पसाक्षी च कल्पकृत् ।
सत्यनाथः(स्) सत्यचारी, सत्यवादी सदास्थितः ॥ 78 ॥

चतुर्मूर्तिश्चतुर्बाहुश्-चतुर्युगपतिर्भवः ।
रामकृष्णो युगान्तश्च, बलभद्रो बलो बली ॥ 79॥

लक्ष्मीनारायणो देवः(श्), शालग्रामशिलाप्रभुः ।
प्राणोऽपानः(स्) समानश्चो - दानव्यानौ तथैव च ॥ 80 ॥

पञ्चात्मा पञ्चतत्त्वं(ञ्) च, शरणागतपालकः ।
यत्किं(ञ्)चित् दृश्यते लोके, तत्सर्वं(ञ्) जगदीश्वरः ॥ 81 ॥

जगदीशो महद्ब्रह्म, जगन्नाथाय ते नमः ।
जगदीशो महद्ब्रह्म, जगन्नाथाय ते नमः ।
जगदीशो महद्ब्रह्म, जगन्नाथाय ते नमः ।
॥ इति श्रीजगन्नाथसहस्रनामस्तोत्रम् ॥

## फलश्रुति

एवं(न्) नामसहस्रेणस्, तवोऽयं(म्) पठ्यते यदि ।
पाठं(म्) पाठयते यस्तु, शृणुयादपि मानवः ॥ 1 ॥

सहस्राणां(म्) शतेनैव, यज्ञेन परिपूज्यते ।
यत्पुण्यं(म्) सर्वतीर्थेषु, वेदेषु च विशेषतः ॥ 2 ॥

तत्पुण्यं(ङ्) कोटिगुणितं(म्), अचिराल्लभते नरः ।
जगन्नाथस्य नामानि, पुण्यानि सफलानि च ॥ 3 ॥

विद्यार्थी लभते विद्यां(यँ), योगार्थी योगमाप्नुयात् ।
कन्यार्थी लभते कन्यां(ञ्), जयार्थी लभते जयम् ॥ 4॥

कामार्थी लभते कामं(म्), पुत्रार्थी लभते सुतम् ।
क्षत्रियाणां(म्) प्रयोगेण,  सं(ङ्)ग्रामे जयदः(स्) सदा ॥ 5 ॥

वैश्यानां(म्) सर्वधर्मः(स्) स्याच्- छूद्राणां(म्) सुखमेधते ।
साधूनां(म्) पठतो नित्यं(ञ्), ज्ञानदः(फ्) फलदस्तथा ॥ 6 ॥

नाऽपवादं(न्) न दुःखं(ञ्) च, कदा च लभते नरः ।
सर्वसौख्यं(म्) फलं(म्) प्राप्य, चिरं(ञ) जीवी भवेन्नरः ॥ 7 ॥

शृणु राजन् महाबाहो, महिमानं(ञ्) जगत्पतेः ।
यस्य स्मरणमात्रेण, सर्वपापैः(फ्) प्रमुच्यते ॥ 8॥

जगन्नाथं(म्) लोकनाथं(म्), पठते यः(स्) सदा शुचिः ।
कलिकालोद्भवं(म्) पापं(न्), तत्क्षणात्तस्य नश्यति ॥ 9 ॥

इति श्रीब्रह्मपुराणे भीष्म- युधिष्ठिर सं(वँ)वादे
श्रीजगन्नाथसहस्रनामस्तोत्रं(म्) संपूर्णम् ॥